
# ||ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ||




Tracking:

| Sl | Date | Remarks | Remarks |
|---|---|---|---|
| 1 | 27/02/2013 | Typing Started on | H K Srinivasa Rao |
| 2 | 03/02/2013 | Typing Ended on | H K Srinivasa Rao |
| 3 | 14/04/2013 | First Proof Reading | H K Srinivasa Rao & Venugopal M S |
| 4 | 23/08/2013 | Published | H K Srinivasa Rao |

भाष्यामृतोत्पादकरोऽनुभाष्य श्रीमान् स भाष्यान्तरकल्पशाखी ।
व्यासं गुरुं संश्रयते बदर्यामानन्दतीर्थाभिधदुग्धसिन्धुः ॥ 03 ॥

सिद्धान्तसंरोहविधौ नियुक्तेष्वेतेष्वेनेकव्रतिषु प्रधानः ।
प्रेमास्पदं स्वीयगुरोः स पद्मनाभार्यवर्योऽकृत दर्शनर्धिम् ॥ 04 ॥

सत्तर्कदीपा(रत्ना)वलिमत्युदारां सन्न्यायरत्नावलिमप्यनिन्द्याम् ।
भाष्यानुभाष्यशयबोधहेतू ततान यस्तार्किकमौलिरत्नम् ॥ 05 ॥

व्याख्यासु यः पाणिनिसूत्रभाष्यव्याख्यादशां व्यञ्जयति स्म साक्षात् ।
छन्नो यवन्या प्रतिपादनेन सहस्रधा सूत्रपदाशयानाम् ॥ 06 ॥

गुरोर्नियोगादधिगम्य राज्यं शिष्यस्तदीयो नृहरिव्रतीन्द्रः ।
गजेशकोशस्थितराममूर्तिं पूर्णप्रबोधाय समार्पयत्ताम् ॥ 07 ॥

सा यत्र रामप्रतिमास्ति तत्र चतुःपुमर्थी सततं चकास्ति ।
आदिश्य चैवं गुरुणैव दत्तामथार्चयत्ता(यंस्था)मनिशं यमीन्द्रः(द्राः)॥ 08 ॥

अन्तेवसंस्तस्य गुरोरनेन सभाजयत्तां प्रतिमां वितीर्णाम् ।
संवर्धयन्नादिमसम्प्रदायमन्योऽभवन्माधवसंयमीन्द्रः ॥ 09 ॥

मुनेरमुष्मादनवद्यबोधात् कृतोपदेशः प्रतिमां च गृह्णन् ।
क्षोभं विधातुं प्रतिवादिवाचामक्षोभ्यनामा मुनिराविरासीत् ॥ 10 ॥

उदरे सुतनोरचाक्षुषत्वं शुभरूपे महति प्रवेशहीनम् ।
विहितं त्रिवलाविवैतदङ्गे पशुयूपे यदरत्निसाप्तदृश्यम् ॥ 33 ॥

उदरस्थशिशोरुदेष्यतः स्याद्वसने लोहितमृत्तिकानुरागः ।
इति तद्घटनाय किन्नु शोणां मृदमासेवत सादरं मृगाक्षी ॥ 34 ॥

द्युनदीं यमुना विजेतुकामा कुरलालिच्छलतो नु कोमलाङ्ग्याः।
कुचमेरुयुगान्निपत्य रोमावलिदम्भादगमच्च मध्यदेशम् ॥ 35 ॥

वसुधासुरवासवस्य गर्भे कृतवासस्य नतभ्रुवोऽर्भकस्य ।
अजनिष्ट मनोरथोऽनुरूपः क्रमशः प्राप्तवति द्वितीयमासे ॥ 36 ॥

भुवने भुवनं कृशानुतप्तं परिक्लृप्तं नवशातकुम्भकुम्भैः ।
अपहाय नदीपयोहिमानीं धवलं केवलमैच्छदच्छबुद्धिः ॥ 37 ॥

रसनानयनान्तरङ्ग(र)म्यं सदने(भवने) भोजनसाधनं विसृज्य ।
परकीयगृहादुपाहृतं तद्रुचिरं वाऽरुचि वाप्यभुङ्क्तैषा ॥ 38 ॥

विदुषी विविधाः कथा वितेने विहगाधीश्वरवाहनाह्वयाङ्काः ।
वदति स्मवदावदाऽबलानां वसति स्मासन एव सन्ततं सा ॥ 39 ॥

पदमेकमलक्तकेन(कैर्न) हीनं पदमेषा विदधाति नाङ्गणेषु ।
विविधानि विसृज्य पूर्वसन्ध्यासमरागाणि सदाम्बराणि वष्टि ॥ 40 ॥

घटिते तनयेऽभिदा तदंशे गुणविध्य(वृद्य)र्थमनु(नू)क्तिसिद्धये च ।

अतिदेशकृते हरेर्गुणानां विवदन्ते खलु जैमिनीयशौण्डाः ॥ 49 ॥

अधिसद्मतलं सुतस्य मूर्त्या स्फुटमङ्गीकृतजानुचङ्क्रमस्य ।

चतुरङ्घ्रिवृषाकृतेः कदाचित्सुरभेराकृतिरेकदाऽन्वकारि ॥ 50 ॥

तनयस्य नवप्रवालवल्ली लसदङ्गुष्ठविराजिताननाब्जम् ।

हृदयाम्बुजमन्तरात्मगर्भं प्रकटं दर्शयतीव सज्जनानाम् ॥ 51 ॥

विहर (दध)न्नवनौ निसर्गरक्तं प्रतिलीलं मुहुरुत्पतपतन्सः ।

लसति स्म करिष्यमाणलक्ष्मीपतिपादानतिशीलनाय वैषः ॥ 52 ॥

बहिरङ्गणसीम्नि केलिभाजस्तनुलग्ना रजसां रराज राजिः ।

जगदात्मविकारसूक्ष्मरूप(पा)प्रकृतिर्विष्णुगतेव दृष्टि योग्या ॥ 53 ॥

महनीयगुणस्य(णः स) मासि षष्ठे सुतमन्नाशननामधर्मवन्तम् ।

अतनिष्ट ततस्तृतीयवर्षे चतुरस्यास्य चकार चौलकर्म ॥ 54 ॥

विलिख्य भूमौ प्रथमं कुमारं रेखामिमामोमिति सम्पठेति ।

पित्रा नियुक्तः पुनरब्रवीत्तं अल्पे कथं वा(सा) गुणपूर्णसङ्ज्ञा ॥ 55 ॥

इति वदन्तमवेक्ष्य सहृज्जनाः श्रुतिशिरोदृढवासनमानसम् ।

कथमयं शिशुरीदृशवाक्पिता सुकृतवानिति विस्मयिनोऽभवन् ॥ 56 ॥

अमुष्य शुद्धं हृदयं पयोधिजामनोहरान्तः पुरमेव मन्महे ।
उरः कवाटं स्थनकीलकीलितं प्रयाति यद्रोमलताभशृङ्खलम् ॥ 28 ॥

तदीयनासानिटिलद्युतिच्छलद्युसिन्धु सिन्धुप्रभुसङ्गमस्थले ।
स्फुरन्महावर्तविभूषितान्तरे विभिन्नवेले इव चिल्लवल्लिके ॥ 29 ॥

तदानने कान्तिपयःपयोनिधौ निमज्जनोन्मज्जनिकेलिकारिणा ।
सुमेषुणा नूनमिमौ समुद्यतौ भुजौ भ्रुवो रूपभृतौ व्यराजताम् ॥30 ॥

अन्तकल्याणगुणैकमन्दिरं हरिं जगद्व्याप्ततनुं हृदन्तरे ।
निधातुकामस्य भुजान्तरं क्रमादमुष्य विस्तारमपारमभ्यगात् ॥ 31 ॥

मनो रमेशास्पदमस्य मञ्जुलं विहर्तुमम्भोरुहसायकेऽञ्चति ।
उरो व्यलासीत्फलको(के)दरोन्नते फलै(भटै)स्तदीयैर्बहिरर्पिते इव ॥ 32 ॥

मृणालवल्लीं कथयन्ति कन्धरां मुखारविन्दस्य विकस्वरश्रियः ।
परे तु नालं मृदुलं गलं जगुर्मुखाभिधा(भा)भृन्मुकुरस्य बन्धुरम् ॥ 33 ॥

उपेयुषो जागरदायिनो हरेः हृदम्बुजादक्षि ततो हृदम्बुजम्।
अमुष्य कण्ठस्थिततैजसात्मनो गृहाणि रेखात्रितयं गलान्तरे ॥ 34 ॥

सदैव दाहो नह(हन)नं कपीश्वरैरगस्त्यपानं मथनं महीभृता ।
इतीव सन्त्यज्य समुद्रमादरादमुष्य कम्बुर्गलतामवाप्तवान् ॥ 35 ॥

करौ कृतौ चेन्नवचूतपल्लवैः कथं सहेते सतताम्बुसङ्गतिम् ।
सदोद्यतस्यास्य सुकर्मदानयोरितीव वेधाः कमले करौ व्यधात् ॥ 36 ॥

अमुष्य लोकत्रयरक्षणक्रियानिबोधनायेह नृणां तनूदरे ।
महामहिम्नोऽस्य वलित्रयच्छलात् कृता विधात्रा किमु चिह्नरेखिका ॥ 37 ॥

पादौ(पदे)कृतौ(ते) चेत्कठिनौ(ने) मया पदा व्रजेदयं तन्न सहे नवाकृतेः ।
चिरेण यानेन चरे(व्रजे)द्वसुन्धरामितीव वेधा मृदुलौ(ले) व्यधादिमौ(मे)॥38॥

ऋणाद्दषीणामथ मुक्तिभाजनं मुमुक्षुमग्र्यं(ग्र्यः) सुधियामृणद्वयात् ।
तदग्रजो वीक्ष्य विवाहमङ्गलं विधातुमैच्छद्गुरुराजनामवान्(भाक्) ॥ 39 ॥

तदाग्रहारे महनीयवैभवे निजाग्रहारस्य समीपवर्तिनि ।
ललास काचित्स्वकुल(त्सगुण)स्य सद्गुणैः समेऽन्ववाये जनिताग्र्यकन्यका ॥ 40 ॥

समुद्रपत्नी भवितेति सादरं प्रसाद्य वाणीमसृजत्पितेति वा ।
सरोवरो नाभिरिवेति वा पुनः सरस्वतीत्येव जुहाव तां जनः ॥ 41 ॥

विवेकनैपुण्यविनीतिदाक्षिणीपतीशभावप्रमुखा निजा गुणाः ।
सुजातमात्रा अपि शोभनाकृतेः समेतरास्ते सफला इवासते ॥ 42 ॥

पदे पदे पल्लवकान्तिसम्पदां निगूढगुल्फौ(ल्फे) नखराः प्रभाकराः ।
निरस्तकूर्माकृतिनी च जानुनी करौ तदूरू करिणो मनोहरौ॥ 43 ॥

घनं तदीयं जघनं यथोचितं कृशं वलग्नं तु कुशेशये शयौ ।
नखानि रत्नानि बिसानुजौ भुजौ गभीरनाभेर्गह(म)नं विमोहनम् ॥ 44 ॥

गलोऽतुलोऽस्याः फलके च तालुनी मुखं तदीयं शशिनाऽऽसनोन्मुखम् ।
रदाश्च गुन्दान्यधरं(रः) सुधोदरं(रः) समुन्नता गन्धफलीव नासिका ॥ 45 ॥

शिशोरमुष्यस्तिलकस्य केलिनीसखस्य डोलेव ललाटपट्टिका ।
चतुष्कपर्दायसशृङ्खलाश्रिता ललन्तिकारत्नगुलिच्छराजिता ॥ 46 ॥

तामुद्विवक्षुः सुरभौ समागते वटुव्रतानां च चतुष्टयं मुदा ।
विधाय भाष्यं लिखति स्म वेङ्कटो विकल्पितं सिन्धुनदीनिमज्जनम् ॥ 47 ॥

सगोपिकाम्बिकाग्रजः सुहृज्जनैस्समन्वितः ।
उपाविशत्सुपूजितो(स पूजिते) मुदैव कन्यकापदम् ॥ 48 ॥

श्रीमत्कश्यपवंशवार्धिशशिनः षड्दर्शनीवल्लभ
श्रीलक्ष्मीनरसिंहवित्तविदुषः श्रीवेङ्कटाम्बामणौ ।
जातेनार्यदयासुधामयगिरा नारायणेनोदिते ।
काव्ये चारुणि राघवेन्द्रविजये सर्गश्चतुर्थोऽभवत् ॥ 49 ॥

॥ इति कविकुलतिलकेन श्रीनारायणाचार्येण विरचिते श्रीराघवेन्द्रविजये चतुर्थः सर्गः समाप्तः ॥

## ॥ अथ पञ्चमः सर्गः ॥

चकितहरिणशावकेक्षणस्त्रीचरणहतोऽपि पुनः पुनर्यदीयः ।
ननु हसतितरामशोकशाखी प्रकटयितुं नितरामशोकभावम् ॥ 24 ॥

कुरुबकविटपे कुशाशयाक्ष्याः कुचयुगलस्तबकेन कामलाङ्ग्याः ।
किमकृत समवायिना वसन्तस्तबककुलानि तदाकृतीनि यस्मिन् ॥ 25 ॥

बकुलतरुरवाप्य वारिजाक्ष्या मुखरससेच(व)नमुन्नतो ऽबलायाः ।
प्रतिकृतिमकृतेव पक्ष्मलाक्ष्याः प्रसवपरम्परया तदङ्गभाजा ॥ 26 ॥

कुवलयदलनीललोचनाभिस्तिलकतरुष्ववलोकितेषु नूनम् ।
प्रतिफलितविलोचनानि नो चेत्समरुचिभाञ्जि कथं सुमानि तेषाम् ॥ 27 ॥

परिहसनपराः पयोरुहाक्ष्यः सुमकपटेन हसन्तमाबबन्धुः ।
व्रतितितिभिरङ्गना नमेरुं परिहसतीति विलोक्य किं मदीयम् ॥ 28 ॥

करपरिमथ(मिल)नात्कुशेशयाक्ष्याः प्रतिविटपं विकचत् प्रसूनशाली ।
सभयमभिनिरीक्षितावकाशो व्यपगतनिद्र इवास यत्र चूतः ॥ 29 ॥

कुवलयदलनीललोचनानां तनुरुचिमीक्षितुमीक्षितोऽङ्गनाभिः ।
तिलकतरुरुदग्रसूनजालैर्दशशतलोचनतामवाप नूनम् ॥ 30 ॥

शुकपिककलकण्ठकिन्नरस्त्रीस्मयहरविस्मयगानमाय(न)ताक्ष्याः(ताङ्ग्याः) ।
सकुतुकमुपकर्ण्य सम्मदेन प्रसवकुलं प्रववर्ष किं प्रियालः ॥ 31 ॥

दुग्धवारिधिपयस्यधिवर्षं शार्ङ्गिणि स्वपति शेषशरीरे ।
मीलनान्नयनयोस्तनुलक्ष्म्यौ मेघपूर्णगगने द्युमणीन्दू ॥ 46 ॥

स्वामिनि क्षतवसौ दिननाथे यत्पुराऽजनि दिनेष्वतिकार्श्यम् ।
तद्विमर्शमधिगम्य दिनानामद्य हृद्ययति वासरवृद्धिम् ॥ 47 ॥

स्वप्रियां जलजिनीं परिभूय प्रोर्मयत्तुहिनहन्तृदिनेभ्यः ।
तादृशी दिनकरोदितवृद्धिर्या निशा क्षयविधावपि दक्षा ॥ 48 ॥

पूर्णिमाहनि स पूषणि मध्ये पुष्करं लसति पुष्करनेत्रम् ।
पूजयन्यतिवरैरिह चातुर्मास्यनामनियमं विदधाति ॥ 49 ॥

पूर्णरोचिषि तुषारमरीचौ भानुमालिनि गतेऽम्बरमध्यम् ।
सोऽयमारभत कर्म हि चातुर्मास्यनाम रचयन् हिरिपूजाम् ॥ 50 ॥

तद्गतैरनुदिनं क्रियमाणेश्वेकवासरकृतं विभवं यः ।
कश्चिदाह यदि हन्त निवृत्तिं ब्राह्मणः श्रुतिततिं स लभेत ॥ 51 ॥

दुर्दिने हरिकटाक्षविहीने पङ्किले च समये समतीते ।
सम्प्रबुद्धहरिवीक्षणगोऽभूद्वासरोऽथ विशदीभवदाशः ॥ 52 ॥

मल्लिकाक्षनिवहेषु मनोज्ञेश्वम्बुजेषु मुदिरेषु शरेषु ।
शत्र तत्र विशदं महिमानं दर्शयन् विहरति स्म स कालः ॥ 53 ॥

सह्यभूधरसरस्सरोजिनीसारसश्रितमरन्दसन्ततिम् ।
या बिभर्ति परथा रमेत किं तत्र रङ्गपतिभृङ्गतल्लजः ॥ 28 ॥

तत्तटोपवनसीम्नि वाहनात्सोऽवरुह्य यमिधुर्यचन्द्रमाः ।
क्षालयन् करपदं समृज्जलैर्दन्तपङ्क्तिपरिशोधनं व्यधात् ॥ 29 ॥

कल्पिताचमनमत्र सादरं स्नानकर्म कुरुते स्म शास्त्रतः ।
अष्टषड् द्विकषडक्षरैर्हरेर्मानितैर्मनुवरैस्त्रिधा क्रमात् ॥ 30 ॥

जप्यसूक्तजपशुद्धवारिणा पोक्षयन्यतिवरः शिरो निजम् ।
स्नातवान्विहितमृद्विलेपनोऽनुच्छ्वसंस्त्रिरघमर्षणं जपन् ॥ 31 ॥

उच्चरन् प्रणवमुत्थितोऽसिचत् स्वात्मगं पुरुषसूक्ततो हरिम् ।
विष्णुपादसलिलं पिबन् सुरान् तर्पितानकृत मन्त्रवारिभिः ॥ 32 ॥

सालमल्लकमवस्तलोहिते वाससी तदनु संयमीश्वरः ।
ऊर्ध्वपुण्ड्रमतनिष्ट गोपिकाचन्दनेन सहपञ्चमुद्रिकम् ॥ 33 ॥

अर्घ्यदानविधिमर्घ्यवैभवः संविधाय हृदि वेदमातरम् ।
सादरं तदनु तारकं ततो मन्त्ररत्नमपि मौनतोऽजपत् ॥ 34 ॥

तत्तटोपवनमेत्य पावनीः सोऽश्रृणोद् द्विजमुखात्कथा हरेः ।
आदिदेशिकसमर्चितोपलव्यासमूर्तिपरपूजनोत्सुकः ॥ 35 ॥

